अष्टमः पाठः
यक्ष-युधिष्ठिरयोः संवादः

महर्षिणा वेदव्यासेन विरचितं 'महाभारतम्' इति नामधेयं महाकाव्यं 'विश्वकोषः' इति नाम्ना प्रसिद्धः। अस्य महाकाव्यस्य वैशिष्ट्यविषये उक्तं यत् 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' अर्थात् अस्मिन् महाकाव्ये यद् वर्णितं तत् अन्यत्र दृश्यते किन्तु यद् अत्र नास्ति तत्तु अन्यत्र कुत्रापि नोपलभ्यते।

विशालकलेवरेऽस्मिन् महाकाव्ये एकलक्षपरिमितं श्लोकाः सन्ति। अत एव अस्य अपरं नाम 'शतसाहस्री संहिता' इत्यपिमन्यते। अस्मिन् महाकाव्ये अष्टादशपर्वाणि सन्ति, एतेषु पर्वेषु कौरव-पाण्डवानां युद्धवर्णनेन सहैव अनेकानि आख्यानोपाख्यानि समाविष्टानि सन्ति। उपाख्यानेषु च कर्मनिष्ठा-ईश्वरभक्तिः-लोकजीवनस्य विविधविषयाणाञ्च सम्यक् चित्रणमस्ति। भारतीयसंस्कृतौ समाजे च वाल्मीकिरामायणवत् अस्य महाकाव्यस्यापि वैशिष्ट्यं विद्यते।

अस्मिन् अध्याये सङ्कलितांशः महाभारतस्य वनपर्वतः गृहीतोऽस्ति। आरण्यकपर्वणः एकस्मिनाख्याने अस्य कथानकस्य वर्णनं विद्यते। पाण्डवाः वनवासकाले यदा द्वैतवने न्यवसन् तदानीम् एकस्मिन् दिवसे एकस्य ब्राह्मणस्य वृक्षोपरिस्थितं अरणीमन्थनकाष्ठं मृगस्य शृङ्गे प्रविष्टम्। मृगश्च तं नीत्वा पलायितः। एतद् दृष्ट्वा सः ब्राह्मणः पाण्डवान् न्यवेदयत्। तदा पाण्डवाः तं मृगम् अन्वगच्छन् प्रयासाधिक्येनापि ते तं हन्तुं न शक्नुवन्। अन्ते च ते गहनारण्ये पिपासा पीड़िताः सञ्जाताः तदा युधिष्ठिरस्य आज्ञां सम्प्राप्य सर्वप्रथमः नकुलः जलस्य अन्वेषणं कर्तुम् अगच्छत्।

जलाशयं प्राप्य यदा सः जलं पातुम् उद्यतोऽभवत् तदानीं तत्र एकः यक्षः समागत्य कथयति यत् 'मे प्रश्नानाम् उत्तरं प्रदाय एव जलं पिबतु इति' किन्तु नकुलः यक्षस्य प्रश्नानामुत्तरं प्रदानं विना जलं पातुं यदा उद्यतोऽभवत् तदा सः मूर्छितः सञ्जातः। एतदनन्तरं क्रमशः सहदेवस्य, अर्जुनस्य, भीमस्यापि सैव स्थितिः सञ्जाता। तदन्तरं युधिष्ठिरः स्वयमागत्य भ्रातॄन् जीवनप्रदानानन्तरम् एव अहं जलं स्वीकरिष्यामि इति यक्षम् अकथयत्। यक्षः तस्य भ्रातृन् जीवनदानम् अयच्छत्। अयमेव अंशः अत्र पाठरूपेण निर्धारितः। एषः प्रश्नोत्तरात्मकः संवादः नूनं ज्ञानवर्द्धकः चारित्रिक शिक्षया च संयुक्तः वर्तते।

स ददर्श हतान् भ्रातॄँल्लोकपालानिव च्युतान्।
युगान्ते समनुप्राप्ते शक्रप्रतिमगौरवम् ।। १ ।।

बुद्ध्या विचिन्तयामास वीराः केन निपातिताः।
गाहमानश्च तत् तोयमन्तरिक्षात् स शुश्रुवे।। २ ।।

यक्ष उवाच–

इमे ते भ्रातरो राजन् वार्यमाणा मया सकृत्।
बलात् तोयं जिहीर्षन्तस्ततो वै मृदिता मया।। ३ ।।

पार्थ ! मा साहसं कार्षीर्मम पूर्वपरिग्रहः।
प्रश्नानुक्त्वा तु कौन्तेय! ततः पिब हरस्व च।। ४ ।।

युधिष्ठिर उवाच–

न चाहं कामये यक्ष तव पूर्वपरिग्रहम्।
यथाप्रज्ञं तु ते प्रश्नान् प्रतिवक्ष्यामि पृच्छ माम्।। ५ ।।

यक्ष उवाच–

किंस्विदावपतां श्रेष्ठं किंस्विन्निवपतां वरम्।
किंस्वित् प्रतिष्ठमानानां किंस्वित् प्रसवतां वरम् ।। ६ ।।

युधिष्ठिर उवाच–

वर्षमावपतां श्रेष्ठं बीजं निवपतां वरम्।
गावः प्रतिष्ठमानानां पुत्रः प्रसवतां वरम् ।। ७ ।।

यक्ष उवाच–

इन्द्रियार्थाननुभवन् बुद्धिमाँल्लोकपूजितः।
सम्मतः सर्वभूतानामुच्छ्वसन् को न जीवति।। ८ ।।

युधिष्ठिर उवाच–

देवतातिथिभृत्यानां पितृणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन् न स जीवति।। ९ ।।

यक्ष उवाच–

किंस्विद् गुरुतरं भूमेः, किंस्विदुच्चतरं च खात्।
किंस्विच्छीघ्रतरं वायोः, किंस्विद् बहुतरं तृणात् ।। १० ।।

युधिष्ठिर उवाच–

माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात् ।। ११ ।।

यक्ष उवाच–

किंस्वित्प्रवसतो मित्रं, किंस्विन्मित्रं, गृहे सतः।
आतुरस्य च किं मित्रं, किंस्विन्मित्रं मरिष्यतः।। १२ ।।

युधिष्ठिर उवाच–

सार्थः प्रवसतो मित्रं, भार्या मित्रं गृहे सतः।
आतुरस्य भिषङ्मित्रं, दानं मित्रं मरिष्यतः ।। १३ ।।

यक्ष उवाच–

कः शत्रुर्दुर्जयः पुंसां, कश्च व्याधिरनन्तकः।
कीदृशश्च स्मृतः साधुरसाधुः कीदृशः स्मृतः।। १४ ।।

युधिष्ठिर उवाच–

क्रोधः सुदुर्जयः शत्रुर्लोभो, व्याधिरनन्तकः।
सर्वभूतहितः साधुरसाधुर्निर्दयः स्मृतः ।। १५ ।।

यक्ष उवाच–

कोऽहङ्कार इति प्रोक्तः कश्च दम्भः प्रकीर्तितः।
किं तद् दैवं परं प्रोक्तं किं तत् पैशुन्यमुच्यते ।। १६ ।।

युधिष्ठिर उवाच–

महाज्ञानमहङ्कारो, दम्भो धर्मो ध्वजोच्छ्रयः।
दैवं दानफलं प्रोक्तं, पैशुन्यं परदूषणम्।। १७ ।।

यक्ष उवाच–

व्याख्याता मे त्वया प्रश्ना याथातथ्यं परन्तप।
तस्मात् त्वमेकं भ्रातृणां, यमिच्छसि स जीवतु ।। १८ ।।

युधिष्ठिर उवाच–

आनृशंस्य परो धर्मः परमार्थाच्च मे मतम्।
आनृशंस्यं चिकीर्षामि नकुलो यक्ष ! जीवतु।। १९ ।।

यक्ष उवाच–

तस्य तेऽर्थाच्च कामाच्च आनृशंस्यं परं मतम्।
तस्मात् ते भ्रातरः सर्वे जीवन्तु भरतर्षभ! ।। २० ।।

❀ ❀ ❀

शब्दार्थाः

युगान्तेः	=	प्रलयकाले (प्रलय काल में)
शक्रप्रतिमगौरवम्	=	इन्द्र के सामन गौरवशाली,
निपातिताः	=	गिराया,
ददर्श	=	दृश् धातु लिट् लकार, प्रथम पुरुष, एकवचन (देखा)
आहमाने	=	प्रविष्ट होते हुए,
तोयम्	=	जलम् (पानी)
वार्यमाना	=	रोके जाते हुए,
पूर्व परिग्रहः	=	पहले से अधिगृहीत वस्तु,
हरस्व	=	ले जाओ,
कामये	=	चाहता हूँ,
प्रतिवक्ष्यामि	=	प्रत्युत्तर दूंगा,
आवपताम्	=	कृषि करने वालों को,
निवपताम	=	बौने वालों को,
खात्	=	गगनात् (आकाश से),
वातात्	=	वायु से
बहुतरी	=	अत्यधिक
प्रवसत्	=	प्रवासी का

किंस्वित्	=	क्या
सतः	=	रहते हुए का
आतुरस्य	=	आतुर शब्द षष्ठी एकवचन (रोगी का)
मरिष्यतः	=	मरने वाले का
अनन्तकः	=	असाध्य
दम्भः	=	कपटाभिमान
दैवम्	=	भाग्यम् (भाग्य)
पैशुन्यम्	=	चुगलखोरी
ध्वजा	=	पताका
आनुवंशस्यम्	=	दया तथा समता भाव को
यथातथ्यम्	=	ठीक से
चिकीर्षामि	=	करना चाहता हूं
भरतर्षभ	=	भारत वर्ष में श्रेष्ठ , भरत + ऋषभ = भरतर्षभ (गुण सन्धि)
उक्त्वा	=	कहकर, वच् + क्त्वा = उक्त्वा
पृच्छ	=	पूछिए
वरम्	=	श्रेष्ठ
गुरुतरम्	=	बड़ा
भिषज्	=	औषधि
परदूषणम्	=	दूसरों में दोष खोजने वाला
जीवन्तु	=	जीवित होंवे

अभ्यासः

वस्तुनिष्ठप्रश्नाः –

१. 'सार्थम् प्रवसतो मित्रम्' इत्यत्र 'सार्थम्' इति पदस्य कोऽर्थः?

(क) विद्वान् (ख) धनवान्

(ग) सहयात्री (घ) भार्या ( )

२. कः शत्रुर्दुर्जयः पुंसाम्?

(क) अहङ्कारः (ख) दम्भः

(ग) क्रोधः (घ) व्याधिः ( )

३. गगनाद्–उच्चतर क:?

(क) माता (ख) पिता

(ग) मित्रम् (घ) वायु: ( )

४. 'पैशुन्य' किम् उच्यते?

(क) अहंकार: (ख) क्रोध:

(ग) परदूषणम् (घ) दम्भ: ( )

लघूत्तरात्मकप्रश्ना: –

१. प्रवसतां किं मित्रम् ?

२. असाधु: कीदृश: स्मृत: ?

३. आतुरस्य किं मित्रम् ?

४. तृणात् किंस्विद् बहुतरम् ?

५. दम्भ: क: परिकीर्तित: ?

निबन्धात्मकप्रश्ना:–

१. 'यक्ष–युधिष्ठिर' इति संवादं स्वभाषया संस्कृतेन लिखतु।

२. यक्ष: जलं पीतमानं युधिष्ठिरं किम् अवदत् ?

व्याकरणात्मक–प्रश्ना:–

(क) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धेर्नाम अपि लेख्यम् -

	पदम्	विच्छेद:	सन्धिनाम
१.	प्रोक्तम्	....	....
२.	इन्द्रियार्थान्	....	....
३.	भरतर्षभ	....	....
४.	देवतातिथि:	....	....
५.	कश्च	....	....

(ख) निम्नलिखितपदानां समास विग्रहं कृत्वा समास नामोल्लेख करणीय: -

	पदम्	विग्रह:	नाम
१.	यथाप्रज्ञम्	....	....
२.	लोकपूजित:	....	....
३.	परदूषणम्	....	....
४.	महाज्ञानम्	....	....

(ग) निम्नाङ्कितानां प्रकृति-प्रत्ययौ लेख्य –

पदम्	उपसर्गः	प्रकृतिः	प्रत्ययः
१. प्रवसतः	....	....	....
२. अनुभवन्	....	....	....
३. प्रोक्तम्	....	....	....
४. कौन्तेय	....	....	....

(घ) अधोलिखित पदानां मूलशब्दं विभक्तिश्च दर्शय –

पदम्	मूलशब्दः	विभक्तिः
१. आतुरस्य	....	....
२. बुद्धया	....	....
३. मया	....	....
४. तस्मात्	....	....

(ङ) निम्नलिखितपदेषु मूलधातुं लकारञ्च चिनुत–

पदम्	धातुः	लकारः
१. हरस्व	....	....
२. जीवतु	....	....
३. चिकीर्षामि	....	....
४. निर्वपति	....	....

(च) निम्नलिखित वाक्यानाम् आधारेण प्रश्ननिर्माणं करोतु–

१. पाण्डवाः पञ्च भ्रातरः आसन्।

....?

२. पाण्डवेषु युधिष्ठिरः ज्येष्ठः आसीत्।

....?

३. गृहे भार्या मित्रं भवति।

....?

४. 'महाभारतं' शतसाहस्री संहिता इत्यपि कथ्यते।

....?

❀ ❀ ❀